CC-0. In Public Domain. Digitization by eGangotri

संस्कृतभाषाप्रचारिण्याः ग्रन्थमालायाः सप्तविंशं कुसुमम्

वाणीं भजत गैर्वाणीम्

संस्कृतबोधिनी–१

संस्कृत बोधिनी – १

(प्रथमा)

रचयिता – आ॰ वरवराजः, शिरोमणिः

प्रकाशिका

संस्कृतभाषाप्रचारिणी सभा, चित्तूरु.

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

संस्कृतभाषाप्रचारिण्याः ग्रन्थमालायाः सप्तविंशं कुसुमम्

वाणीं भजत गैर्वाणीम्

संस्कृतबोधिनी–१

(प्रथमा)

रचयिता – आ. वरदराजः, शिरोमणिः

प्रकाशिका

संस्कृतभाषाप्रचारिणी सभा, चित्तूरु.

क्रोधन पुष्य पूर्णिमा | 1986 | मूल्यम् रू ४-८०

4/80

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

1986 द्वितीयावृत्तिः – 5000

वजय मुद्राशाला, चित्तूरु. (आं. प्र.)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विज्ञप्तिः

❀

आर्याः,

संस्कृतभाषा प्रचारिण्याः सभायाः परिचय परीक्षार्थिनां तदन्येषां च उपकाराय इदं पुस्तकं मुद्रापितं सभया। एतत्पुस्तकरचयित्रे एतत्सभा-कार्यवर्गसदस्याय श्री आ. वरदराजमहाशयाय कृतज्ञतां निवेदयामः।

इति निवेदयिता,

के. मुनिरेड्डिः,

प्रकाशकमन्त्री

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रस्तावना

अयि भोः सुहृदः पण्डितप्रवराः ! !

बहोः कालादनन्तरं इयं संस्कृतभाषाप्रचारिणीसभा नूतनपाठ्य-प्रणालीं प्रवेशयति । तदन्तर्गततया "संस्कृत बोधिनी" नाम्ना वाचकत्रयं परिचयाभिज्ञ-विचक्षणानां कृते प्रकाशयति ।

तत्र परिचयपरीक्षायै संस्कृतबोधिनी (प्रथमा) नियताऽस्ति । अस्मिन् वाचके संज्ञा-सर्वनाम-विशेषण-क्रियाऽव्ययानां सामान्य परिचयः समुद्दिष्ठः । एतदर्थं सरलतरवाक्यैः केचन पाठाः कथारूपाः, गेयरूपाः कतिचन पाठाश्च विरच्य समायोजिताः । पाठानामन्ते प्रदत्तेषु अभ्यासेषु 1) प्रश्नाः 2) पूरणं 3) पदच्छेदः (सन्धिः) इति त्रयं प्रामुख्यं भजति । एवं पदपरिचयः, पर्यायपदानि, व्यतिरेकार्थकाः शब्दाः, लिंग-विभक्त्यादिकं च अध्यापकैः बोधनीय मिति न विशिष्य वक्तव्यं भवति ।

एवं संस्कृत परिचय परीक्षायै समुद्दिष्टा मिमां संस्कृतबोधिनीं प्रथमां परीक्षार्थिनां सुखबोधाय संस्कृत प्रचारकमहाशयाः सहृदयभावेन स्वीकुर्युरिति, स्खालित्यानि सदयं सूचयेयु रिति च विज्ञापयामः ।

इति,

संस्कृतप्रचाराभिलाषी,

आ० वरदराजः, शिरोमणिः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

K.K. Sharma
3.5.88

विषयसूचिका

क्र. सं.	विषयः	पृष्ठसंख्या
i	अक्षरसमाम्नायः अचः (स्वराः)	1
ii	,, हलः (व्यञ्जनानि)	3
iii	,, स्वरितावलिः	7
	अभ्यासः (i)	9
	अभ्यासः (ii) पठन लेखनार्थम्	11
(iv)	,, संयुक्ताक्षराणि-पदानि च	13
1)	वाणीं भजत गीर्वाणीम् (गेयम्)	15
2)	सचित्र पाठमाला	17
3)	अयं-इयं-इदम्	22
4)	सः-सा-तत्	26
5)	इमौ-इमे	29
6)	तौ-ते	31
7)	इमे-इमाः-इमानि	36
8)	ते-ताः-तानि	39
9)	कुत्र अस्ति?	42

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

10)	इदं कीदृशम्	45
11)	अहं-त्वम्	50
12)	मम-तव	53
13)	कति (सम्भाषणम्)	57
14)	शरीरम्	60
15)	काकः जम्बुकश्च (कथा)	63
16)	बन्धुजनः	66
17)	पाठशाला	70
18)	गृहम्	73
19)	गृहे गृहे च संस्कृतम् (गेयं)	76
20)	कीलोत्पाटी वानरः (कथा)	78
21)	सूर्यः	80
22)	दिनांकः	83
23)	खेलनम्	87
24)	राजा ज्ञानी च	89
25)	महाभारत कथा	91
26)	सुभाषितानि	95
27)	संख्यानम् (संख्यावाचकाः)	98
28)	हे रसने (गेयम्)	103

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अक्षरसमाम्नाय : (i)

अच : (स्वरा :) - Vowels

देवनागरी	तेलुगु	कन्नडं	तमिळं	मलयाळं	आंग्लम्
अ	అ	ಅ	அ	അ	A
आ	ఆ	ಆ	ஆ	ആ	Ā
इ	ఇ	ಇ	இ	ഇ	I
ई	ఈ	ಈ	ஈ	ഈ	Ī
उ	ఉ	ಉ	உ	ഉ	U
ऊ	ఊ	ಊ	ஊ	ഊ	Ū
ऋ	ఋ	ಋ	ரு	ഋ	Ṛ
ॠ	ౠ	ೠ	ரூ	ൠ	Ṝ
ऌ	ఌ	—	லு	ഌ	Ḷ
ए	ఏ	ಏ	எ	ഏ	E
ऐ	ఐ	ಐ	ஐ	ഐ	Ai

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

देवनारी	तेलुगु	कन्नडं	तमिळं	मलयाळं	आंग्लम्
ओ	ఓ	ಓ	ஓ	ഓ	O
औ	ఔ	ಔ	ஔ	ഔ	Au
अं	అం	ಅಂ	அம்	അം	Am
अः	అః	ಅಃ	அஹ	അഃ	Aha

प्रश्न :—समानाकाराणि अक्षराणि पृथक्कृत्य लिखत ।

अभ्यास :

अच :	शब्दा :	अच :	शब्दा :
अ	अज :	ऌ	ऌकार :
आ	आप :	ए	एष :
इ	इन :	ऐ	ऐक्यम्
ई	ईश :	ओ	ओज :
उ	उर :	औ	और्व :
ऊ	ऊरु :	अं	अंस :
ऋ	ऋषि :	अ :	सः (स् + अः)
ॠ	ऋकार :		

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अक्षरसमाम्नाय : (ii)

हल : (व्यञ्जनानि) Consonants

	देवनागरी	तेलुगु	कन्नडं	तमिळं	मलयाळं	आंग्लम्
क वर्ग :	क	క	ಕ	க	ക	Ka
	ख	ఖ	ಖ	க^{2}	ഖ	Kha
	ग	గ	ಗ	க^{3}	ഗ	Ga
	घ	ఘ	ಘ	க^{4}	ഘ	Gha
	ङ	ఙ	ಙ	ங	ങ	Ṅa
च वर्ग :	च	చ	ಚ	ச	ച	Ca
	छ	ఛ	ಛ	ச^{2}	ഛ	Cha
	ज	జ	ಜ	ச^{3}	ജ	Ja
	झ	ఝ	ಝ	ச^{4}	ഝ	Jha
	ञ	ఞ	ಞ	ஞ	ഞ	N̄a
ट वर्ग ;	ट	ట	ಟ	ட	ട	Ta
	ठ	ఠ	ಠ	ட^{2}	ഠ	Tha

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

	देवनागरी	तेलुगु	कन्नडं	तमिळं	मलयाळं	आंग्लम्
	ड	డ	ಡ	ட^{3}	ഡ	Ḍa
	ढ	ఢ	ಢ	ட^{4}	ഢ	Ḍha
	ण	ణ	ಣ	ண	ണ	Ṇa
त वर्गः	त	త	ತ	த	ത	Ta
	थ	థ	ಥ	த^{2}	ഥ	Tha
	द	ద	ದ	த^{3}	ദ	Da
	ध	ధ	ಧ	த^{4}	ധ	Dha
	न	న	ನ	ந	ന	Na
प वर्गः	प	ప	ಪ	ப	പ	Pa
	फ	ఫ	ಫ	ப^{2}	ഫ	Pha
	ब	బ	ಬ	ப^{3}	ബ	Ba
	भ	భ	ಭ	ப^{4}	ഭ	Bha
	म	మ	ಮ	ம	മ	Ma

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

	देवनागरी	तेलुगु	कन्नडं	तमिळं	मलयाळं	आंग्लम्
अन्तस्था :	य	య	ಯ	ய	യ	Ya
	र	ర	ರ	ர	ര	Ra
	ल	ల	ಲ	ல	ല	La
	व	వ	ವ	வ	വ	Va
ऊष्माण :	श	శ	ಶ	ச	ശ	Ṡa
	ष	ష	ಷ	ஷ	ഷ	Sha
	स	స	ಸ	ஸ	സ	Sa
	ह	హ	ಹ	ஹ	ഹ	Ha

प्रश्न :—समानाकाराणि भिन्नाकाराणि च अक्षराणि पृथक्-पृथक् लिखत ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अभ्यासः

कर। चयः कटः कणः नभः भटः

खलः छदः मठः तनुः पलाशः मनः

गजः जडः डमरुः दधि फलम् यमः

घनः झषः ढकः धवः बकः रथः

लवः शरः सरः

वनम् षटः हय।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अक्षर-समाम्नायः (III)

स्वरितावलिः

(Consonant of vowel combination)

★

हल्	अच्	स्वरितरूपं	स्वरचिह्नं	विशिष्टशब्दाः
क्	अ	क	-	करः
क्	आ	का	ा	काकः
क्	इ	कि	ि	दिनम्
क्	ई	की	ी	दीपः
क्	उ	कु	ु	गुरुः
क्	ऊ	कू	ू	कूपः
क्	ऋ	कृ	ृ	कृपा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्	ॠ	कॄ	ॄ	पितॄणम्
क्	ऌ	कॢ	ॢ	कॢप्तम्
क्	ए	के	े	मेघः
क्	ऐ	कै	ै	शैलः
क्	ओ	को	ो	लोकः
क्	औ	कौ	ौ	नौका
क्	अं	कं	ं	कंसः
क्	अः	कः	ः	हंसः

सूचना – स्वरचिह्‌नां स्थानानि -

अधः - ु, ू, ृ, ॄ, ॢ

पुरः - ि, पश्चात् – ा, ी, ो, ौ, ः

ऊर्ध्वं - े ै ं

अन्य हल्‌वर्णैं स्सह बोधनीयानि ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अभ्यासः (i)

★

क	का	कि	की	कु	कू	कृ	कॄ	कॢ	के	कै	को	कौ	कं	कः
ग	गा	गि	गी	गु	गू	गृ	–	–	गे	गै	गो	गौ	गं	गः
च	चा	चि	ची	चु	चू	चृ	–	–	चे	चै	चो	चौ	चं	चः
ज	जा	जि	जी	जु	जू	जृ	–	–	जे	जै	जो	जौ	जं	जः
ट	टा	टि	टी	टु	टू	टृ	–	–	टे	टै	टो	टौ	टं	टः
ड	डा	डि	डी	डु	डू	डृ	–	–	डे	डै	डो	डौ	डं	डः
ण	णा	णि	णी	णु	णू	णृ	–	–	णे	णै	णो	णौ	णं	णः
त	ता	ति	ती	तु	तू	तृ	–	–	ते	तै	तो	तौ	तं	तः
द	दा	दि	दी	दु	दू	दृ	–	–	दे	दै	दो	दौ	दं	दः
न	ना	नि	नी	नु	नू	नृ	–	–	ने	नै	नो	नौ	नं	नः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प पा पि पी पु पू पृ – – पे पै पो पौ पं पः

ब बा बि बी बु बू बृ – – बे बै बो बौ बं बः

भ भा भि भी भु भू भृ – – भे भै भो भौ भं भः

म मा मि मी मु मू मृ – – मे मै मो मौ मं मः

य या यि यी यु यू यृ – – ये यै यो यौ यं यः

र रा रि री रु रू – – – – रे रै रो रौ रं रः

ल ला लि ली लु लू लृ – – ले लै लो लौ लं लः

व वा वि वी वु वू वृ – – वे वै वो वौ वं वः

श शा शि शी शु शू शृ – – शे शै शो शौ शं शः

ष षा षि षी षु षू षृ – – षे षै षो षौ षं षः

स सा सि सी सु सू सृ – – से सै सो सौ सं सः

ह हा हि ही हु हू हृ – – हे है हो हौ हं हः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अभ्यासः (ii)

(पठन-लेखनार्थम्)

★

कालः	तालः	पाशः	भारः	यागः	लाभः
चारः	दावः	बालः	मारः	रामः	वादः
कविः	खनिः	चितिः	ऋषिः	रविः	हरिः
किरिः	गिरिः	मणिः	तिथिः	विधिः	क्षितिः
कीटः	दीपः	नीलः	क्षीमः	वीरः	सीरः
जीवः	धीरः	पीतः	मीनः	शीतः	हीरः
खुरः	रघुः	भानुः	विभुः	शुकः	हुतः
गुरुः	वटुः	वपुः	विधुः	सुतः	क्षुधा
कूपः	घूकः	जूटः	दूतः	पूतः	मूकः
गूढः	चूतः	तूलः	धूमः	भूतः	हूणः
कृशः	घृतम्	तृणम्	पृथा	वृषः	कृतिः
गृहम्	कृपा	भृशम्	मृगः	सृष्टिः	धृतिः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

खेदः	देहः	तेजः	धेनुः	मेघः	शेषः	
छेदः	चेतः	देवः	भेकः	लेशः	वेषः	
कैतवं	तैलम्	धैर्यम्	पैत्यम्	वैरम्	सैन्यम्	
चैत्रम्	दैवम्	नैजम्	मैत्रम्	शैलः	हैमम्	
कोपः	घोषः	दोषः	बोधः	मोक्षः	लोकः	
गोपः	चोरः	पोतः	भोगः	रोगः	सोमः	
कौतुकम्	चौलम्	धौतम्	पौरः	मौनम्	शौरिः	
गौरी	दौत्यम्	नौका	भौमः	यौवनम्	क्षौमम्	
वाक्	अच्	राट्	मरुत्	तत्	क्षुत्	धीमान्
ककुप्	वार्	दिव्	मनस्	(एवमादयो हलन्ताः)		

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अक्षर समाम्नायः ४

संयुक्ताक्षराणि - पदानि च

★

संयोगः	अक्षरं	पदम्	संयोगः	अक्षरं	पदम्
क्+ष	क्ष	लक्षणम्	श्+र=	श्र	श्रीः
ज्+ञ=	ज्ञ	ज्ञानम्	ह्+य=	ह्य	ग्राह्यम्
त्+र=	त्र	पात्रम्	श्+न=	श्न	प्रश्नः
द्+य=	द्य	विद्या	र्+थ=	र्थ	अर्थः
द्+म=	द्म	पद्म	ब्+ध=	ब्ध	लब्धम्
ह्+म=	ह्म	ब्रह्मा	ट्+य=	ट्य	नाट्यम्
ह्+न=	ह्न	चिह्नम्	क्+व=	क्व	पक्वम्
ह्+व=	ह्व	जिह्वा	क्+र=	क्र	चक्रम्
त्+य=	त्य	सत्यम्	ल्+य=	ल्य	शल्यम्
क्ष्+म=	क्ष्म	लक्ष्मीः	ष्+ठ=	ष्ठ	पृष्ठम्
क्+म=	क्म	रुक्मम्	ग्+र=	ग्र	ग्रामः
क्+क=	क्क	कुक्कुरः	द्+र=	द्र	रुद्रः
क्+ल=	क्ल	शुक्लः	ष्+ट्+र=	ष्ट्र	रष्ट्रम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्+त=	क्त	रक्तम्	ध्+र=	ध्र	गृध्रः
क्+य=	क्य	वाक्यम्	प्+र=	प्र	विप्रः
क्+न=	क्न	शक्नोति	ध्+न=	ध्न	बध्नः
क्+म=	ग्म	वाग्मी	स्+र=	स्र	स्रोतः
ग्+र=	घ्र	घ्राणम्	भ्+र=	भ्र	भ्रमः
ङ्+ख=	ङ्खः	शङ्खः	म्+र=	म्र	आम्रः
च्+च=	च्च	कच्चित्	व्+र=	व्र	व्रीहिः
च्+य=	च्य	वाच्यम्	र्+क=	र्क	अर्कः
ज्+र=	ज्र	वज्रम्	र्+य=	र्य	सूर्यः
ञ्+च=	ञ्च	पञ्च	न्+द्+व	न्द्व	द्वन्द्वम्
द्+=	द्व	द्वौ	र्+ध्+व=	र्ध्व	ऊर्ध्व
ण्+ड=	ण्ड	षण्डः	र्+घ्+य=	र्घ्य	अर्घ्यम्
			र्+ष्+य=	ष+र्य	ईर्ष्या
			र्+थ्+य=	र्थ्य	पारार्थ्य
			ज्+ञ्+य=	ज्ञ्य	कार्तज्ञ्य

☆

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(१) प्रथमः पाठः

श्रीः

वाणीं भजत गैर्वाणीम्

गेयम्

वाणीं भज रे वाणीं,
गैर्वाणीं भज रे वाणीम् ॥ वाणीं ॥

शुक-पिक-मधुर-निनादं,
वाणी-वीणा-वादं,
मोहन-मुरली-नादं,
विस्मारयतीयं वाणी ॥ वाणीं ॥

वेद-वाद-वाणीयम्;
वाल्मीकि-मधुर-वाणीयम्;
व्यास-भास-वाणीयम्;
कवि-कालिदास-वाणीयम् ॥ वाणीं ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सूचना – (संस्कृत - प्राशस्त्य बोधक मिदं गेयं मधुररागेण विद्यार्थिभिः गापनीयम् । बृन्दगानाभ्यासः करणीयः । सारस्वत समावेशेषु अस्य प्रयोगः कर्तव्यः ।

प्रश्नाः - इयं वाणी का ?

इयं वाणी कीदृशी ?

इयं वाणी किं करोति ?

पूरयत - वाणीं - गैर्वाणीम् ।

इयं वाणी — — —विस्मारमति ।

अमरकोशः - "ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती"

☆

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(२) द्वितीयः पाठः

सचित्र - पाठ - माला

रामः

सीता


फलम्


बालः

बाला

मुखम्

अजः

माला

गृहम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



गजः



डोला

धनम्

घटः

लता

वनम्



कटः

माता

पत्रम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

बटः



नौका



पुष्पम्

करः

वीणा



नेत्रम्



शरः

नदी

तृणम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पादः



शिबिका

कागितम्

रथः



नासिका



चक्रम्



हलः



लेखिनी



पुस्तकम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सूचना – चित्रैः त्रिषु लिंगेषु एकवचनशब्दाः बोधनीयाः ।

प्रश्नाः – १) अयं कः ?

२) इयं का ?

३) इदं किम् ?

पूरयत – अयं ———

इयं——— ।

इद——— ।

★

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(३) तृतीयः पाठः

अयं-इयं-इदम्

अयं बालः

इयं बाला

अयं अजः

इयं माला



अयं गजः



इयं डोला

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अयं घटः

इयं लता



अयं शरः

इयं वीणा

इदं फलम्

इदं मुखम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



इदं गृहम्　　　　　　　　　　　　इदं धनम्

इदं पुष्पम्

सूचना – समीपस्थ-वस्तु वाचकानां शब्दानां त्रिषु लिंगेषु इदंशब्देन निर्देशपुरस्सरं प्रथमैकवचनं बोधनीयम्

प्रश्नाः – (1) अयं कः ?
(2) इयं का ?
(3) इदं किम् ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पूरयत – 1) अयं ——— । (माला, गजः, धनम्)

2) ———मुखम् । (इयं, अयं, इदम्)

3) इयं——— । (पुष्पं, डोला, शरः)

4) ———फलम् । (अयं, इदं, इयम्)

व्याकरण विशेषः – एतादृशेषु वाक्येषु "अस्ति, भवति, क्रिया पदयोः अप्रयोगेऽपि तदर्थबोधः भवति ।

उदहरणं – अयं बालः । इदं फलं ।
अयं बालः अस्ति । इदं फलं अस्ति ।
अयं बालः भवति । इदं फलं भवति ।

☆

(4)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(४) चतुर्थः पाठः

सः-सा-तत्

सः बालः

सा बाला

सः अजः



सा माला



सः गजः



सा डोला

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सः घटः

सा लता



सः शरः

सा वीणा

तत् फलम्

तत् मुखम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तत् गृहम्

तत् धनम्

तत् पुष्पम्

सूचना – दूरस्थ वस्तुवाचकानां शब्दानां त्रिषु लिंगेषु तच्छब्देन निर्देश-पुरस्सरं प्रथमैकवचनं बोधनीयम् ।

प्रश्नाः – 1) सः कः ?

2) सा का ?

3) तत् किम् ?

पूरयत – 1) सः———— । (बालः, लता, गृहम्)

2) ————लता । (सः, सा, तत्)

3) ————धनम् । (,, ,, ,,)

4) सा———— । (धनम्, घटः, वीणा)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(५) पञ्चमः पाठः

इमौ-इमे

इमौ बालौ



इमे बाले

इमौ अजौ



इमे माले



इमौ गजौ



इमे डोले

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इमौ घटौ

इमे लते



इमौ शरौ



इमे वीणे

इमे फले



इमे मुखे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इमे गृहे



इमे धने



इमे पुष्पे

सूचना – समीपगत वाचकानां शब्दानां त्रिषु लिंगेषु इदं शब्देन निर्देश पुरस्सरं प्रथमा द्विवचनं बोधनीयम् ।

प्रश्ना. – 1) इमौ कौ ?

2) इमे के ? (स्त्रीलिंगे, नपुंसकलिंगे च)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पूरयत – 1) ——————पुष्पे । (इमौ, इमे)

2) इमे—————— । (गजौ, लते)

3) ——————शरौ । इमे, (इमौ)

व्याकरणविशेषः – ईदृशेषु वाक्येषु "स्तः, भवत" क्रियापदयोः अप्रयोगेऽपि तदर्थबोधः भवति ।

उदा – इमौ बालौ । इमे फले ।

इमौ बालौ स्तः । इमे फले स्तः ।

इमौ बालौ भवतः । इमे फले भवतः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(६) षष्ठः पाठः

तौ – ते

तौ बालौ

ते बाले

तौ अजौ



ते माले

तौ गजौ



ते डोले

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तौ घटौ



ते लते



तौ शरौ



ते वीणे

ते फले

ते मुखे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



ते गृहे



ते धने



ते पुष्पे

सूचना –दूरस्थ वाचकानां शब्दानां त्रिषु लिंगेषु तच्छब्देन निर्देश पुरस्सरं प्रथमाद्विवचनं बोधनीयम् ।

प्रश्नाः – 1) तौ कौ ?

2) ते के ? (स्त्रीलिंगे नपुंसकलिंगे च)

पूरयत – 1) तौ ———— । (पुष्पे, लते, अजौ)

2) —— —— वीणे । (तौ, ते, सा)

3) ते —— —— । (शरौ, लता, फले)

(5 A)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(७) सप्तमः पाठः

इमे - इमाः - इमानि



इमे बालाः



इमाः बालाः

इमे अजाः



इमाः मालाः



इमे गजाः



इमाः डोलाः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इमे घटाः

इमाः लताः



इमे शराः



इमाः वीणाः

इमानि फलानि

इमानि मुखानि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इमानि गृहाणि

इमानि धनानि





इमानि पुष्पाणि

सूचना – समीपस्थवाचकानां शब्दानां त्रिषु लिंगेषु इदं - शब्देन निर्देश पुरस्सरं प्रथमाबहुवचनं बोधनीयम् ।

प्रश्नाः – (1) इमे के ? (पुंलि ब. व)

(2) इमाः काः ?

(3) इमानि कानि ?

पूरयत – 1) इमे ———— । (फलानि, मालाः, घटाः)

2) ———— बालाः स्त्री) इमानि, इमाः, इमे)

3) इमानि ———— । (घटाः, वीणाः, गृहाणि)

व्याकरणविशेषः – एतादृशेषु वाक्येषु "सन्ति, भवन्ति" क्रियापदयोः अप्रयोगेऽपि तदर्थबोधः भवति ।

उदा – इमे बालाः । इमानि फलानि ।

इमे बालाः सन्ति । इमानि फलानि सन्ति ।

इमे बालाः भवन्ति । इमानि फलानि भवन्ति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(८) अष्टमः पाठः

ते - ताः - तानि



ते बालाः

ताः बालाः (स्त्री)

ते अजाः



ताः मालाः

ते गजाः



ताः डोलाः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ते घटाः

ताः लताः

ते शराः



ताः वीणाः



तानि फलानि

तानि मुखानि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तानि गृहाणि



तानि धनानि



तानि पुष्पाणि

सूचना –दूरस्थ वाचकानां शब्दानां त्रिषु लिंगेषु तच्छब्देन निर्देश पुरस्सरं प्रथमा बहु वचनं वोधनीयम् ।

प्रश्नाः – 1) ते के ? (पु. लि. ब. व.)
2) ताः काः ?
3) तानि कानि ?

पूरयत – 1) ते ———— । (मुखानि, बालाः)
2) —— ——गृहाणि । (ते, ताः, तानि)
3) ताः —— —— । (शरः, डोलाः, पुष्पाणि)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

९ नवमः पाठः

कुत्र अस्ति ?

(अत्र – तत्र; अस्ति – सन्ति ।)



अयं बालः अत्र अस्ति । सा बाला तत्र अस्ति ।

इदं फलं अत्र अस्ति । सा माला तत्र अस्ति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



इमौ घटौ अत्र स्तः ।   ते वीणे तत्र स्तः ।



इमे गृहे अत्र स्तः ।   ते डोले तत्र स्तः ।

इमानि फलानि अत्र सन्ति ।   तानि गृहाणि तत्र सन्ति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इमे शराः अत्र सन्ति ।



ताः वीणाः तत्र सन्ति ।

सूचना – समीपे दूरे च स्थितानां वस्तुवाचकशब्दानां इदं - तच्छब्दाभ्यां त्रिषु लिंगेषु प्रथमा त्रिवचनेषु निर्देशपुरस्सरं "अस्ति–स्तः–सन्ति प्रयोगाभ्यासः करणीयः ।

प्रश्नाः – 1) अयं बालः कुत्र अस्ति ?
2) सा माला कुत्र अस्ति ?
3) इदं फलं कुत्र अस्ति ?
4) ते डोले कुत्र स्तः ?
5) इमौ घटौ कुत्र स्तः?
6) ताः वीणाः कुत्र सन्ति ?
7) इमानि फलानि कुत्र सन्ति ?
8) इमे दीपाः कुत्र सन्ति ?

पूरयत – 1) इदं फलं —— ——। (तत्र, अत्र; अस्ति, स्तः, सन्ति)
2) तानि गृहाणि —— —— ,,
3) इमे माले —— ——। ,,
4) तौ गजौ —— ——। ,,
5) इमानि गृहाणि—— ——। ,,
6) ते लते —— ——। ,,
7) इमाः वीणाः —— ——। ,,
8) सः घटः —— ——। ,,

अव्ययानि – अत्र, तत्र, कुत्र ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(१०) दशमः पाठः

इदं - कीदृशम् ?



अयं रमेशः । अयं ज्येष्ठः ।   सः सुरेशः । सः कनिष्ठः ।

इयं सीता । इयं ज्येष्ठा ।   सा गीता । सा कनिष्ठा ।



इदं पत्रम् । इदं हरितम् ।   तत् पुष्पम् । तत् रक्तम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



अयं गजः । गजः श्यामः ।



सः अजः । अजः श्वेतः ।

अयं शुकः । शुकः हरितः ।



सः बकः । बकः श्वेतः ।

लता हरिता ।

तृणं अपि हरितम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



कमलं रक्तम् ।



धेनुः कपिला ।



हयः श्वेतः ।

महिषः श्यामः, महिषी अपि श्यामा ।

क्षीरं श्वेतम् । दधि अपि श्वेतम् ।



अयं मानदण्डः । अयं दीर्घः । अयं अपि मानदण्डः ।
अयं दीर्घतरः । सः अपि मानदण्डः । सः दीर्घतमः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



गजः स्थूलः । अजः सूक्ष्मः । पिपीलिका सुसूक्ष्मा ।

नीरं मधुरं । क्षीरं मधुरतरं । मधु मधुरतमम् ।



तालः उन्नतः । वटः महान् वृक्षः । हिमालयः महान् पर्वतः

सूचन ।– त्रिलिंगेषु विशेषणानि बोधनीयानि ।

प्रश्नाः – 1) रमेशः कीदृशः ? 2) सुरेशः कीदृशः ?

3) सीता कीदृशी ? 4) गीता कीदृशी ?

5) पत्रं कीदृशम् ? 6) पुष्पं कीदृशम् ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पूरयत – 1) गजः————। 2) ———— कपिला।

3) बकः ————। 4) कमल ————।

5) दधि ————। 6) मधु ——।

प्रयोगः – अपि, " तर-तम "

1) अजः श्वेतः। हयः अपि श्वेतः

2) पत्रं हरितम्। तृणं अपि हरितम्।

इमे मानदण्डाः। एषु अयं दीर्घः ; अयं तु दीर्घतरः;

स तु दीर्घतमः।

वृक्षः महान्। वटः वृक्षः महत्तरः। पर्वतः महत्तमः।

व्यतिरेकशब्दाः – ज्येष्ठः × कनिष्ठः श्वेतं × श्यामम्

स्थूलः × सूक्ष्मः

पर्यायः–मानदण्डः मात्रा-दण्डः (मीटर्)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(११) एकादशः पाठः

अहं - त्वम्

अहं बालः । त्वं अपि बालः । अयं अपि बालः । वयं बालाः । त्वं पाठं पठ । त्वं किं करोषि ? अहं पाठं पठामि । अहं पाठं लिखामि । अहं किं करोमि ? त्वं पाठं लिखसि । अयं पाठं पठति । वयं पाठं पठामः । वयं पाठं लिखामः ।

अहं अत्र अस्मि । त्वं कुत्र असि ? अहं अपि अत्र अस्मि । अयं कुत्र अस्ति ? अयं अपि अत्र अस्ति । वयं अत्र स्मः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

त्वं चित्रं पश्य । अहं चित्रं पश्यामि ।

त्वं कथां श्रुणु । अहं कथां श्रुणोमि ।

त्वं चित्रं पश्यसि । अहं चित्रं पश्यामि । अयं अपि चित्रं पश्यति । वयं चित्रं पश्यामः ।

त्वं कथां श्रुणोषि । अहं कथां श्रुणोमि । अयं अपि कथां श्रुणोति । वयं कथां श्रुणुमः ।

सूचना – विधी, वर्तमानपुरुषत्रये क्रियाः द्वितीया विभक्तिश्च बोधनीयाः

प्रश्नाः – 1) त्वं कः ? 2) अहं कः ? 3) अयं कः ?
4) वयं के ? 5) त्वं किं करोषि? 6) अहं किं करोमि ?
7) अयं किं करोति 8) वयं किं कुर्मः ? 9) वयं कुत्र स्मः ?
10) वयं किं पश्यामः ?

पूरयत – 1) —— अपि बालः । 2) —— पाठं पठ ।
3) त्व——करोषि । 4) अहं पाठं —— ।
5) ——पाठं पठामः । 6) त्वं चित्रं—— ।
7) —— कथां श्रुणोमि । 8) अय पाठ —— .
9) —— चित्रं पश्यामः । 10) वयं कथां—— ।

व्याकरण विशेषाः – अह बालः
अहं बालः अस्मि ।
त्वं बालः । वयं बालाः
त्वं बालः असि । वयं बालाः स्मः

अस्तिवत् "अस्मि, असि, स्मः, क्रियापदानां अप्रयोगेऽपि तदर्थबोधः भवति"

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

क्रिया: –

विधि:		वर्तमानकाल:			
त्वं	पठ।	त्वं	पठसि।	अहं	पठामि
,,	लिख।	,,	लिखसि।	,,	लिखामि।
,,	पश्य।	,,	पश्यसि।	,,	पश्यामि।
,,	श्रुणु।	,,	शृणोषि।	,,	शृणोमि।
,,	कुरु।	,,	करोषि।	,,	करोमि।

व. का.

अयं	पठति।	वयं	पठामः।
,,	लिखति।	,,	लिखामः।
,,	पश्यति।	,,	पश्यामः।
,,	शृणोति।	,,	शृणुमः।
,,	करोति।	,,	कुर्मः

विभक्ति: –	प्रथमा	द्वितीया
	पाठः	पाठं
	कथा	कथां
	चित्रं	चित्रं

व्यतिरेकशब्दा: –	अहम् × त्वम्	वयम् × यूयम्	अयम् × सः
	इयम् × सा	इदम् × तत्	इमे × ते
	इमाः × ताः	इमानि × तानि	

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(१२) द्वादशः पाठः

मम - तव

अयं मम करः ।



अयं तव पादः ।



इयं मम नासिका ।



इयं तव वीणा ।

इदं मम शिरः ।



इदं तव पुस्तकम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इमौ मम पादौ ।



इमे तव नेत्रे ।



इमौ मम करौ ।



इमे तव माले ।



इमानि मम पुस्तकानि ।

तानि तव पुस्तकानि ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इदं मम गृहम् ।

तत् तव पुष्पम् ।

अयं मम पिता ।

सा तव माता ।

अयं मम भ्राता ।

सा तव भगिनी ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सूचना – षष्ठीविभक्तेः एकवचनं बोधनीयम्

प्रश्नाः – 1) तव करः कः ?
2) मम पादः कः ?
3) इयं कस्याः नासिका ?
4) इयं कस्याः वीणा ?
5) किं तव शिरः ?
6) इदं कस्य पुस्तकम् ?
7) इमे कस्य नेत्रे ?
8) इमौ कस्य करौ ?
9) इदं कस्य गृहम् ?
10) तव पिता कः ?
11) सा मम का ?
12) सः तव कः ?

पूरयत – 1) इमानि —— पुस्तकानि ।
2) तानि —— पुस्तकानि ।
3) ——मम नासिका ।
4) तव —— ।
5) —— मम भ्राता
6) इदं——पुष्पम् ।

व्याकरणविशेषः – "अस्य, तस्य
अस्याः, तस्याः
इति षष्ठीविभक्तिप्रयोगः कारयितव्यः

उदा – इदं अस्य गृहम्
एतत् तस्य पुस्तकम्
इयं अस्याः माता
सा तस्याः भगिनी

☆

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(१३) त्रयोदशः पाठः

कति ? (सम्भाषणम्)

गुरुः – रमेश ! कुत्र असि ?

रमेशः – एषोऽस्मि भोः ।

गुरुः – अयं कः ?

रमेशः – अयं करः ।

गुरुः – इयं का ?

रमेशः – इयं अंगुली ।

गुरुः – करे कति अंगुल्यः सन्ति ?

रमेश – करे पञ्च अंगुल्यः सन्ति ।

गुरुः – उमे !

उमा – एषोऽस्मि भोः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

गुरुः – त्वं किं पठसि ?

उमा – अह संस्कृतं पठामि ।

गुरुः – संस्कृते कति परीक्षाः सन्ति ?

उमा – संस्कृते पञ्च परीक्षाः सन्ति ।

गुरुः – तव नेत्राणि कति ?

उमा – मम द्वे नेत्रे स्तः ।

गुरुः – कराः कति ?

उमा – द्वौ करौ ।

गुरुः – पादाः कति ?

उमा – पादौ द्वौ ।

गुरुः – पशोः पादाः कति ? रमेश !

रमेशः – पशोः चत्वारः पादाः । गुरो !

गुरुः – अस्तु, रमेश ! किं त्वं संख्यानं जानासि ?

रमेशः – जानामि भोः, किञ्चिदिव ।

गुरुः – तर्हि ब्रूहि, यावत् जानासि ।

रमेशः – एकं, द्वे, त्रीणि, चत्वारि, पञ्च, षट् सप्त,
अष्ट, नव, दश ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

गुरुः – ततः ।

रमेशः – ततः न जानामि भोः ।

गुरुः – अहं ब्रवीमि; श्रुणु । एकादश, द्वादश, त्रयोदश, चतुर्दश, पञ्चदश, षोडश, सप्तदश, अष्टादश, एकोनविंशतिः, विंशतिः ।

एवं त्रिंशत्, चत्वारिंशत्, पञ्चाशत्, षष्टिः सप्ततिः; अशीतिः, नवतिः, शतं इति दशशः संख्यानं भवति । पश्चात् बोधयामि तावत् ।

प्रश्नाः – 1) करे कति अंगुल्यः सन्ति ?
2) संस्कृते कति परीक्षाः सन्ति ?
3) तव नेत्राणि कति ?
4) पशोः पादाः कति ?
5) तव कति कराः ?

पूरय – 1) मम ———— नेत्रे । 2) तव———— करौ ।
3) पशोः ——पादाः । 4) करे————अंगुल्यः ।
5) शिवस्य नेत्राणि———— ।

पदच्छेदः – एषः + अस्मि, किं + चित् + इव ।
(एषा + अस्मि)

अव्ययानि – भोः, किञ्चिदिव, तर्हि, यावत्, तावत्, ततः
न, एवं, इति, दशशः, पश्चात्

★

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(१४) चतुर्दशः पाठः



शरीरम्

★

इदं शिरः । शिरसि इमे नेत्रे । इयं नासिका । इमौ कर्णौ । इदं मुखम् । मुखे इयं जिह्वा । इमे दन्ताः । इमौ ओष्ठौ । अयं कण्ठः । इदं उरः । इमौ अंसौ । इमौ भुजौ । इमौ करौ । करयोः पञ्च पञ्च अंगुल्यः सन्ति । इदं उदरम् । इयं कटिः । इदं पृष्ठम् । इमे ऊरू । इमे जानुनी । इमे जंघे । इमौ पादौ । पादयोः अपि पञ्च पञ्च अंगुल्यः सन्ति । इमे शरीरस्य अवयवाः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वयं शिरसा देवं नमामः। वयं नेत्राभ्यां पश्यामः। नासिकया श्वसिमः गन्धं जिघ्राम श्च। कर्णाभ्यां शब्दं श्रुणुमः। मुखेन पिबामः, भक्षयामः, वदाम श्च। जिह्वया वयं रसं रसयामः। कराभ्यां वयं कर्म कुर्मः। अंगुळीभिः स्पृशामः। पादाभ्यां गच्छामः आगच्छामश्च। शरीरावयवैः वयं विविधं कर्म कुर्मः।

सूचना – शरीरावयवानां निर्देशपुरस्सरं बोधनं, तत्कार्यनिरूपणं च।

प्रश्नाः – 1) शिरसि किं किं अस्ति ? 2) शरीरस्थ अवयवाः के ?
3) करयोः कति अंगुल्यः सन्ति ? 4) शिरसा वयं किं कुर्मः ?
5) नेत्राभ्यां वय किं कुर्मः ? 6) वयं कथ श्रुणुमः ?
7) नासिकया वयं किं कुर्मः ? 8) जिह्वया किं कुर्मः ?

पूरयत – 1) वयं——श्वसिमः। 2) वयं अंगुलीभिः——।
3) ——वयं गच्छामः। 4) वयं——वदामः।
5) शिरसि——सन्ति। 6 ——जिह्वा दन्ताः च सन्ति।

पदच्छेदः – जिघ्रामः + च, वदामः + च, आगच्छामः + च,
शरीर + अवयवैः

अव्ययं – च

अमरकोशः – गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः
कायो देहः (क्लीबपुंसोः, स्त्रियां) मूर्ति स्तनुस्तनूः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

व्याकरण विशेष: – विभक्ति:

द्वितीयाविभक्ति: – देवं, रसं, गन्धं, शब्दं, कर्म

तृतीयाविभक्ति: – शिरसा, नेत्राभ्यां, नासिकया

मुखेन, कर्णाभ्यां, जिह्वया

कराभ्यां

पादाभ्यां

शरीरावयवैः, अंगुळीभि:

सप्तमी विभक्ति: – शिरसि, मुखे, करयोः, पादयोः

☆

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(१५) पञ्चदशः पाठः

काकः जम्बुकश्च

काकः कश्चित् अपूपं अपहृत्य आगतः । सः अपूपं भक्षयितुं वृक्षस्य शाखायां उपविष्टः । अत्रान्तरे जम्बुकः कश्चित् तत्र आगतः सः काकस्य मुखे अपूपं अपश्यत् । तं अपहर्तुं जम्बुकः उपायं अचिन्तयत् ।

सः काकं प्रति एवं अवदत्-काक ! मातुल ! भवान् अतीव सुन्दरः । तव वर्णः मनोहरः । तव कण्ठस्वरः अतीव मधुरः । तव गानं श्रोतुं इच्छामि । कृपया श्रावय-इति ।

काकः स्तुतिप्रियः । सः आत्मानं अतीव सुन्दरं मन्यमानः मुखं व्यादाय गातुं आरभत । काकस्य मुखात्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

यदा अपूपः भूमौ पपात, तदा तं गृहीत्वा जम्बुकः पलायितः। जम्बुकेन वञ्चितः काकः पश्चात् दुःखितः।

वञ्चकाः प्रियं वदन्ति। बुद्धिमान् न शृणुयात्।

प्रश्नाः – 1) काकः कुत्र उपविष्टः ?

2) किमर्थं स तत्र उपविष्टः ?

3) जम्बुकः किं अपश्यत् ?

4) सः किं अचिन्तयत् ?

5) काकं प्रति जम्बुकः किं अवदत् ?

6) काकः कथं गातुं आरभत ?

7) जम्बुकः किं अकरोत् ?

8) वञ्चकाः किं वदन्ति ?

पूरयत – 1) काकः——————भक्षयितुं वृक्षस्य——————उपविष्टः।

2) जम्बुकः——————मुखे——————अपश्यत्।

3) काकः मुखं——————गातुं ———।

4) ——————वञ्चितः काकः पश्चात्——————।

प्रयोगः – "यदा–तदा" "चित्"

यदा घण्टा भवति तदा बालाः पाठशालां प्रति आगच्छन्ति।

उदा-कश्चित् काचित्, केचित्, कानिचित्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पदच्छेद: – कः + चित्, अत्र + अन्तरे, अति + इव,

अमरकोश: – "काके तु करटारिष्ट-बलिपुष्ट-सकृत्प्रजा:"
"शृगाल बंचक क्रोष्ठु फेरु फेरव जम्बुका:"

उदा –	कृदन्तानि	क्रियापदानि
	आगतः।	आगच्छत्।
	उपविष्टः।	उपाविशत्।

कृदन्तानि कर्तृ–लिंग वचने अनुसरन्ति इति विशेष:।

अव्ययानि –	प्रति	अपहृत्य	अपहर्तुं
	इति	व्यादाय	श्रोतुं
	एवं	गृहीत्वा	गातुं
	न		
	अतीव		यदा-तदा
	पश्चात्		
	चित्		

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(१६) षोडशः पाठः



बन्धुजनः (सम्भाषणम्)

पिता – राधे ! बन्धुजनं बोधयामि; शृणु ।

राधा – बन्धुः नाम कः ?

पिता – जन्मना विवाहेन च सम्बन्धो भवति ।

राधा – तव मम च कः सम्बन्धः ?

पिता – त्वं मम पुत्री असि; अहं तव पिताऽस्मि । तव माता मम पत्नी भवति । अहं तस्याः पतिः अस्मि । एवं शेखरः तव भ्राता, मम पुत्रश्च भवति । तस्य त्वं भगिनी भवसि । शेखर ! मम भ्राता तव कीदृशो बन्धुः ?

शेखरः – पितुः भ्राता पितृव्यः खलु ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पिता – आं, मम भगिनी ?

शेखरः – पितुः भगिनी पितृष्वसा किल ।

पिता – राधे ! तव मातुः भ्राता कीदृशो बन्धुः ?

राधा – मातुः भ्राता मातुलः खलु !

पिता – आं, मातुः भगिनी ?

राधा – मातुः भगिनी मातृष्वसा किल !

पिता – शेखर ! मम पिता तव कथं बन्धुः ?

शेखरः – पितुः पिता हि पितामहः ।

पिता – आं, मम माता ?

शेखरः – पितुः माता पितामही ।

पिता – राधे ! तव मातुः पिता तव कथं बन्धुः ?

राधा – मातुः पिता मातामहो भवति ।

पिता – आं, तव मातुः माता ?

राधा – मातामही किल !

पिता – साधु । सम्यक् उक्तम् । एवं अन्येऽपि

9

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

बन्धवः सन्ति । तान् वदामि; शृणु –

पौत्रः=पुत्रस्य पुत्रः । पौत्री=पुत्रस्य पुत्री ।

दौहित्रः=दुहितुः पुत्रः । दौहित्री=दुहितुः पुत्री ।

श्वशुरः=भर्तुः, भार्याया वा पिता ।

श्वश्रूः=भर्तुः भार्याया वा माता ।

भागिनेयः=भगिन्याः पुत्रः ।

स्नुषा=पुत्रस्य पत्नी ।

जामाता=दुहितुः पतिः ।

प्रजावती=भ्रातुः भार्या ।

देवरः=पत्युः भ्राता ।

ननादा=पत्युः भगिनी

स्यालः=भार्यायाः भ्राता ।

मातुलानी=मातुलस्य भार्या

राधे ! – पितुष्वसुः पुत्रः माधवः कीदृशो बन्धुः ?

राधा – (लज्जया मौनं वहति)

पिता – आं, तव पैतृष्वसेयः । विवाहे सति तव पतिः, मम जामाता च भविष्यति । शुभं भवतु ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रश्नाः – 1) मातुलः कथं बन्धुः भवति ?
2) पितुः भ्राता कीदृशो बन्धुः ?
3) मातुः पिता कः भवति ?
4) पितुः माता का भवति ?
5) पत्युः पिता कः भवति ?
6) कः जामाता भवति ?
7) का स्नुषा भवति ?
8) भ्रातुः भार्या का भवति ?

पूरयत – 1) जन्मना विवाहेन च ———— भवति ।
2) ————एव बन्धव इति ।
3) पुत्रस्य पुत्रः————भवति ।
4) दुहितुः————जामाता भवति ।
5) मातुः माता ———— ।
6) भार्यायाः भ्राता ———— ।

पदच्छेदः – सम्बन्धः + भवति, कीदृशः + बन्धुः, पिता + अस्मि, अन्ये + अपि

अव्ययानि – नाम, च, एव, खलु, किल, हि, आं, कथं, साधु,

अमरकोशः – "सगोत्र बान्धव ज्ञाति बन्धु स्व स्वजनाः समाः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(१७) सप्तदशः पाठः



पाठशाला (सम्भाषणम्)

इयं पाठशाला । इयं संस्कृत-पाठशाला । अस्यां पाठशालायां पञ्च कक्ष्याः सन्ति । ताः – परिचयः, अभिज्ञः, विचक्षणः, समर्थः, कोविद श्च इति ।

अत्र त्रयः अध्यापकाः तिस्रः अध्यापिका श्च पाठयन्ति । यदा अध्यापकाः आगच्छन्ति, तदा विद्यार्थिनः उत्तिष्ठन्ति, प्रणमन्ति च ।

अयं प्रार्थना-समावेशः । सर्वे विद्यार्थिनः गायन्ति "वाणीं भजरे वाणीं; गैर्वाणीं भजरे वाणीं" इति । प्रार्थनानन्तरं सर्वे कक्ष्यासु उपविशन्ति ।

गुरुः – हे राम! अत्र अगच्छ । त्वं किं पठसि ?

रामः – अहं परिचय-कक्ष्यां पठामि भोः ।

गुरुः – राम! त्वं गच्छ, उपविश । गोपाल ! रामः किं करोति ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

गोपालः - सः गच्छति, उपविशति ।

गुरुः – गोपाल ! त्वं पुस्तकं आनय । माधव ! गोपालः किं करोति ?

माधवः – सः पुस्तकं आनयति ।

गुरुः – गोपाल ! पुस्तके पाठं पठ! शेखर ! गोपालः किं करोति ?

शेखरः – सः पाठं पठति ।

गुरुः – रमे ! त्वं किं पठसि ?

रमा – अहमपि परिचय-कक्ष्यां पठामि भोः ।

गुरुः – तव कक्ष्यायां कति विद्यार्थिनः पठन्ति ?

राम – मम कक्ष्यायां दश विद्यार्थिन्यः विंशतिः विद्यार्थिन श्च पठन्ति ।

उमा – शुक्रवासरे शनिवासरे च पाठशालायाः विरामो भवति ।

गुरुः – गीते ! कुत एवं; जानासि ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

गीता – बाढं, जानामि । शुक्रवासरे बालिका: अभ्यंग-स्नानं कुर्वन्ति, देवीं पूजयन्ति च । शनिवासरे बालका: अभ्यंग-स्नानं कृत्वा देवं पूजयन्ति । अत: विद्यार्थिनां दिनद्वयं विरामकाल: ।

गुरु: – अस्तु, स्वस्ति ।

प्रश्ना: – 1) संस्कृत पाठशालायां कति कक्ष्या: सन्ति ?
2) विद्यार्थिन: कदा उत्तिष्ठन्ति प्रणमन्ति च ?
3) प्रार्थनासमावेशे विद्यार्थिन: किं कुर्वन्ति ?

पूरयत – 1) अत्र त्रय:————अध्यापिका श्च पाठयन्ति ।
2) ——अध्यापका: आगच्छन्ति——विद्यार्थिन: उत्तिष्ठन्ति ।
3) परिचय कक्ष्यायां दश ———— विद्यार्थिन श्च पठन्ति ।
4) ——वासरे——वासरे च पाठशालाया: विराम: ।
5) बालिका: शुक्रवासरे——कुर्वन्ति——पूजयन्ति च ।
6) शनिवारे ———— अभ्यंगस्नानं —— —— देवं——

पदच्छेद: – कोविद: + च, अध्यापिका: + च, विद्यार्थिन: + च,
विराम: + भवति,

क्रिया: – सन्ति, पाठयन्ति, आगच्छन्ति, उत्तिष्ठन्ति, प्रणमन्ति, गायन्ति उपविशन्ति, पठन्ति, आनयति, गच्छ × आगच्छ, जानासि-जानामि, कुर्वन्ति पूजयन्ति ।

उमरकोश: – "मन्त्रव्याख्या कृदाचार्य: उपाध्यायस्त्वध्यापक:"

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(१८) अष्टादशः पाठः



गृहम्

इदं मम गृहम् । मम गृहे पिता माता भ्राता भगिनी अहं चेति आहत्य पञ्च वसामः । मम पिता अध्यापकः । सः पाठशालायां पाठान् बोधयति । माता गृह-कृत्यं करोति । सा अन्नं पचति, परिवेषयति च । मम भगिनी ज्येष्ठा । भ्राताऽपि ज्येष्ठः । अहं कनिष्ठः । मम नाम रामः । भगिनी भ्राता अहं च संस्कृतं पठामः ।

अस्माकं गृहं उन्नत-स्थले निर्मित मस्ति । गृहस्य द्वाराणि गवाक्षाणि च विशालानि । अतः वायोः प्रकाशस्य च प्रसारो भवति ।

अस्माकं गृहे विद्युद्दीपाः सन्ति । रात्रौ दश घण्टा-पर्यन्तं वयं पठामः लिखाम श्च । रेडियो-पेटिकाऽपि अस्ति । ततः वयं वार्ताः शृणुमः । सा कदाचित् गायति । तदा वयं संगीत मपि शृणुमः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

गृहस्य पुरतः पुष्पवाटिकाऽस्ति । गृहस्य पृष्ठभागे कूपः अस्ति । कूपस्य जलं अतीव स्वादु । प्रतिदिनं कूपात् जलं उद्धृत्य पुष्पवाटिकां सिञ्चामः । पुष्पाणि नानावर्णानि मनोहराणि च भवन्ति । तेषां गन्धः मनः प्रसादयति । भगिनी पुष्पैः मालां ग्रथयति । सा पुष्पमालया शिरः अलंकरोति । माता प्रतिदिनं प्रातः पुष्पैः देवीं पूजयति ।

प्रश्नाः – 1) तव नाम किम् ?

2) तव गृहे के के कति सन्ति ?

3) तव पिता किं करोति ?

4) तव माता किं करोति ?

5) यूयं किं पठथ ?

6) युष्माकं गृहं कथं निर्मित मस्ति ?

7) यूयं कथं वार्ताः संगीतं च श्रुणुथ?

8) पुष्पवाटिका कुत्र अस्ति ?

9) कूपः कुत्राऽस्ति ?

10) पुष्पाणि कीदृशानि ?

पूरयत – 1) गृहस्य ——— ———पुष्पवाटिकाऽस्ति ।

2) गृहस्य ——— ———कूपः अस्ति ।

3) कूपस्य जलं ——— ——— ।

4) भगिनी———मालां——— ।

5) माता प्रातः———पूजयति ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पदच्छेद: – च + इति, भ्राता + अपि, विद्युत् + दीप:, लिखाम: + च, प्रसार: + भवति, अति + इव,

व्याकरण विशेष: विभक्तय:

प्र. वि – गृहं, पिता, माता, भ्राता, भगिनी, अहं, अध्यापक:

द्वि. वि – पाठान्, अन्नं, वार्ता:, संगीतं, पुष्पवाटिका, मन:, मालां, शिर:, देवीं

तृ. वि – पुष्पै:, पुष्पमालया,

प. वि – कूपात्

ष. वि – मम, अस्माकं, गृहस्थ, वायो:, प्रकाशस्य, कूपस्य, तेषां

स. वि – गृहे, रात्रौ, उन्नतस्थले, पृष्ठभागे

अमरकोश: – "गृहं गेहोद वसिते वेश्म सद्म निकेतनम्"

★

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(१९) एकोनविंशः पाठः

गृहे गृहे च संस्कृतम्

गृहे गृहे च संस्कृतम्,
मुखे मुखे च संस्कृतम्,
पदे पदे च संस्कृतम्,
स्वरे स्वरे च संस्कृतम्,

कदा सदा भवे दिदम्
हितं प्रमोद-वर्धनम् !

असभ्यता-निवारकम्,
सुसभ्यता प्रचोदकम्,
निसर्ग-धर्म-रक्षकम्,
कुमार्गतो निवर्तकम् ।

कदा च संस्कृतं भवेत्
प्रजा-समाज-भाषितम् ।

कदा नु रामवर्तनम्
सदा च जानकी-मतिः,
नरे च योषिति स्थिरम्,
भवे च्च भारतांगणे ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कदा च संस्कृतं भवेत्
प्रजासमाज-भावितम् !

(गेय गैर्वाणीतः)

प्रश्नाः – 1) कुत्र कुत्र संस्कृतं भवेत् ?
2) संस्कृतं कीदृशम् ?
3) भारतांगणे किं किं भवेत् ?

पूरयत – 1) गृहे गृहे——————— ।
2) ——————मुखे ——————संस्कृतम् ।
3) कदा च———भवेत्—————— ।
4) कदा——— रामवर्तनं सदा च——— ।
5) नरे —— योषिति —— भवेच्च —— ।

पदच्छेदः – भवेत् + इदम्, भवेत् + च, भारत + अंगणे
(स. दी. सं)

व्यतिरेकशब्दाः – हितम् × अहितम्, सभ्यता × असभ्यता,
धर्मः × अधर्मः, रक्षकम् × भक्षकम्, कुमार्गः × सुमार्गः,
निवर्तकम् × प्रवर्तकम्, स्थिरम् × अस्थिरम् ।

★

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(२०) विंशः पाठः



कीलोत्पाटी वानरः

★

ग्रामीणः कश्चित् सम्पन्नः गृहं निर्मातुं उद्युक्तः। सः दारु-संग्रहाय कर्मकरान् नियोजयामास। ते वनं गताः महावृक्ष मेकं परशुभिः छित्वा पातयामासुः। क्रकचैः ते दारुखण्डान् बहून् विदारितवन्तः। मध्याह्ने भोक्तुं ते कस्मिंश्चित् अर्धदारिते दारुखण्ड (द्वय) मध्ये कीलकं निक्षिप्य गताः।

तत्रैको वानरयूथः क्रीडन्नागतः। तेषु एको बाल-वानरः दारुखंडान् अधिरुह्य, इतस्ततः उत्पतन् निपतन् अर्ध-दारिते (दारु) मध्ये उपविष्टः। तस्य लांगूलं तन्मध्ये प्रविष्टम्। सः चापलात् स्वसामर्थ्यं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रदर्शयितुं हस्ताभ्यां धृत्वा कीलकं आकृष्टवान् । यदा कीलकं उत्पाटितं तदा अर्ध-दारितं खण्डद्वयं संलग्न मभवत् । तन्मध्ये पतितं वानरस्य लांगूलं निष्पिष्टं अभवत् । बाधया वानरो मृतः ।

अनधिकार-चेष्टा न कर्तव्या ।

प्रश्नाः – 1) कः गृहं निर्मातुं उद्युक्तः ?
2) कर्मकराः कुतो वनं गताः ?
3) ते महावृक्षं कथं पातयामासुः ?
4) ते कीलकं कुत्र निक्षिप्य गताः ? किमर्थम् ?
5) बालवानरः कुत्र उपविष्टः ?
6) सः कीलकं कुतः आकृष्टवान् ?
7) वानरः कथं मृतः ?

पूरयत – 1) अनधिकार चेष्टा —— —— ।
2) सम्पन्नः—— ——कर्मकरान् —— —— ।
3) कर्मकराः—— ——दारुखंडान् ——विदारितवन्तः ।
4) ते भोक्तुं—— —— कीलकं निक्षिप्य —— —— ।
5) वानरः चापलात् —— ——कीलकं—— —— ।
6) दारुखण्डमध्ये ——वानरस्य लांगूलं ——अभवत् ।

पदच्छेदः – तत्र + एकः, क्रीडन् + आगतः, इतः + ततः,
वानरः + मृतः ।

अमरकोशः – "कपि-प्लवंग-प्लवग-शाखमृग-वलीमुखाः"

★

10–A

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(२१) एकविंशः पाठः



सूर्यः

सूर्यः आकाशे दिवा प्रकाशते। अत एव तस्य दिवाकरः इत्यपि नामान्तरम्। सः प्राच्यां दिशि उदेति, प्रतीच्यां अस्तं गच्छति। सूर्येण वयं दिशो जानीमः। सूर्याभिमुखस्य नरस्य प्राक् प्राची पश्चात् प्रतीची, दक्षिणतः दक्षिणा, (अवाची) वामतः उदीची इति चतस्रः दिशः ज्ञायन्ते।

भारतस्य प्राच्यां वंग-समुद्रः, प्रतीच्यां अरब-सागरः, उदीच्यां हिमालयः, दक्षिणायां (अवाच्यां) हिन्दु-महासागर श्च अस्ति। भारतवासिनः सूर्यं देवं भावयन्तः नित्यं प्रणमन्ति।

भूमिः सूर्यस्य उपग्रहः। सा सूर्यं परितः भ्रमति। अतः षट् ऋतवो भवन्ति। ते च – वसन्तः, ग्रीष्मः,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

वर्षा, शरत्, हेमन्तः, शिशिर श्चेति। वसन्ते तरु लतादयः पल्लविता भवन्ति। अयं मनोहरः कालः। ग्रीष्मे सूर्यः प्रचण्ड स्तपति। वापी - कूप - तटाकेभ्यः समुद्रेभ्य श्च वारि सूर्यस्य तापेन शुष्यति। तत् मेघेषु निक्षिप्तं भवति। वर्षासु मेघाः वर्षन्ति। भूमिः सस्यश्यामला भवति। अन्नं च बहुविध मुत्पद्यते। अन्नेन सर्वे प्राणिनः जीवन्ति। एवं सूर्यः वर्षाधारः जीवनाधार श्च भवति।

अत एव सूर्यः भारतवासिभिः "भगवान् नारायण" इति भाव्यते। नमोऽस्तु भगवते सूर्यनारायणाय।

प्रश्नाः – 1) सूर्यः कुत्र कदा प्रकाशते ?

2) तस्य नामान्तरं किं ? कथं ?

3) स कुत्र उदेति ? कुत्र अस्तं गच्छति ?

4) वयं दिशः कथं जानीमः ?

5) भारतस्य चतसृषु दिक्षु किं किमस्ति ?

6) भूमिः कस्य उपग्रहः ?

7) ऋतवः कति ? के ते ? कथं भवन्ति ?

8) मनोहरः कालः कः ?

9) ग्रीष्मे सूर्यः कथं भवति ?

10) सूर्यः जगदाधारः कथं भवति ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पूरयत – 1) भारतवासिनः सूर्यं ——— ——— भावयन्तः नित्यं ——— ।

2) वापीकूप तटाकेभ्यः ——— सूर्यस्य ——— ——— शुष्यति ।

3) वारि ——— ——— निक्षिप्तं ——— ——— ।

4) अन्नेन ——— ——— ——— जीवन्ति ।

5) सूर्यः वर्षाधारः ——— ——— ——— च भवति ।

6) नमोऽस्तु ——— ———

पदच्छेदः – इति + अपि, नाम + अन्तरं सूर्यं + अभिमुखस्य

हिम + आलयः, ऋतवः + भवन्ति, शिशिर + च + इति

प्रचण्डः + तपति, नमः + अस्तु ।

अमरकोशः – "सूरसूर्यर्यमादित्य द्वादशात्मा दिवाकराः"

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(२२) द्वाविंश: पाठ: ।

दिनांक:

गुरु: – शेखर ! अद्य दिनाङ्क: क: ?

शेखर: – अद्य 15—5—80 दिनांक: ।

गुरु: – ह्य: क: दिनांक: आसीत् ?

शेखर: – ह्य: 14—5—80 दिनांक: आसीत् ?

गुरु: – श्व: क: दिनांक: भविष्यति ?

शेखर: – श्व: 16—5—80 दिनांको भविष्यति ।

गुरु: – दिनांके कस्य कस्य परिगणनं भवति ?

शेखर: – दिनांके दिनस्य, मासस्य, वत्सरस्य च परिगणनं भवति । क्री. श. संवत्सर: 1980, मे मास:, चतुर्दशं पञ्चदशं षोडशं वा दिनं इति दिनांक–परिगणनं भवति ।

गुरु: – माधव ! अस्माकं पञ्चाङ्गेषु कस्य परिगणनं भवति ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

माधवः – पञ्चाङ्गेषु तिथीनां वाराणां नक्षत्राणां योगानां करणानां च परिगणनं भवति ।
अत एव खलु पञ्चांग मिति नाम सिद्धम् ।

गुरुः – संवत्सरस्य कति मासाः ?

शेखरः – द्वादशः मासाः भोः ।

गुरुः – मासः कथं भवति ?

शेखरः – द्वौ पक्षौ त्रिंशत् दिनानि वा–मासो भवति ।

गुरुः – कौ तौ पक्षौ ?

शेखरः – शुक्लपक्षः कृष्णपक्ष श्चेति ।

गुरुः – पक्षः कथं भवति ?

शेखरः – चन्द्रस्य वृद्धि क्षयं च अनुसृत्य शुक्लपक्षः कृष्णपक्ष श्च भवति ।

गुरुः – पक्षे पक्षे कति तिथयः ?

शेखरः – प्रतिपक्षं पञ्चदश तिथयः ।

गुरुः – कास्ता स्तिथयः ? राघव ! त्वं ब्रूहि ।

राघवः – प्रतिपत् (प्रथमा) द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी, सप्तमी, अष्टमी, नवमी, दशमी, एकादशी, द्वादशी, त्रयोदशी, चतुर्दशी, पूर्णिमा, अमावास्या च ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

गुरुः – पञ्चदशी तिथिः कुतो नाऽस्ति ?

राघवः – पञ्चदशी तिथिः शुक्लपक्षे पूर्णिमा इति, कृष्णपक्षे अमावास्या इति च उच्यते ।

गुरुः – कुतः तस्याः तिथेः तथा नाम जातम् ? किं जानासि रमेश !

रमेशः – न जानामि भोः । बोधयतु भवान् ।

गुरुः – शुक्लपक्षे पञ्चदशे दिने चन्द्रः पूर्णो भवति । अतः तस्य दिनस्य पूर्णिमा इति नाम । कृष्णपक्षे चन्द्रः सूर्येण सह वर्तते । अमा= सह, वसतीति अमावास्या । मां=कान्ति, विना वर्तते सूर्येण सह इति तस्य दिनस्य अमावास्या इति नाम । मासाः कति के ते?

रमेशः – चैत्रः, वैशाखः, ज्येष्ठः, आषाढः, श्रावणः, भाद्रपदः, आश्वयुजः, कार्तिकः, मार्गशीर्षः, पौषः, माघः, फाल्गुनश्चेति द्वादश मासाः ।

गुरुः – एवं मासानां नामानि कथं सिद्धानि ? माधव जानासि वा न वा ?

माधवः – जानामि भोः । पूर्णिमायां यत् नक्षत्रं चन्द्रस्य समीपे वर्तते तन्नक्षत्रनाम्ना मास नाम सिद्धम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

गुरुः – भारतीयदिनांके कस्य कस्य परिगणनं भवति ?
रमेशः ! ब्रूहि ।

रमेशः – नहि जानामि भोः ।

गुरुः – श्रुणु तावत्; शालिवाहनशकसंवत्सरस्य चैत्रादि मासानां दिनानां च परिगणनं भवति । प्रथमं षट्सु मासेषु एकत्रिंशत् दिनानि अनन्तरं षट्सु मासेषु त्रिंशत् दिनानि इति नियमोऽस्ति । चतुर्थांकेन शा. श. संवत्सर-संख्यायाः विभागे द्वयं शिष्यते चेत् सः अधिवत्सरो भवति । चैत्रस्य तु अधिवत्सरे (Leap year) एकत्रिंशत् दिनानि भवन्ति । वर्षत्रयानन्तरं अधिवत्सरो भवति । वर्षत्रये चैत्रस्य त्रिंशदेव दिनानि इति नियमः । 26-1-1902 इति दिनांके शा. श. संवत्सरः 1902, चैत्रमासः, 26 षड्विंशतितमं दिनं इति परिगण्यते । शा. श. 1902 अधिवत्सरो भवति । अस्मिन् वत्सरे चैत्रस्य एकत्रिंशत् दिनानि ।

अमरकोशः– पूर्णे निशाकरे राका पौर्णमासी च पूर्णिमा ।
अमावास्या त्वमावस्या दर्शः सूर्येन्दुसंयमः ।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(२३) त्रयोविंशः पाठः

खेलनम्

इदं सुविशालं समतलम्। ईदृशं स्थलं मैदान मिति वदन्ति। अत्र बालाः बालिका श्च विविधान् खेलान् खेलन्ति। खेलाः क्रीडाः इत्यपि उच्यन्ते। अतः एव अस्य क्रीडाङ्गण मिति नाम।

क्रीडाः स्वदेशीयाः विदेशीया श्चेति द्विविधाः। स्वदेशीयासु क्रीडासु व्ययो न भवति। विदेशीयासु क्रीडासु तावत् व्ययोऽधिकः। कन्दुकादिभिः परिकरैः काश्चित् क्रीडा भवन्ति। काश्चित् क्रीडाः अपरिकरा एव भवन्ति। नानाविधाः कन्दुक-क्रीडाः सपरिकराः। कबड्डी प्रभृतयः क्रीडाः अपरिकराः। क्रीडासु कुशलाः क्रीडाकारा इत्युच्यन्ते।

केचित् जालं बद्ध्वा कन्दुक-क्रिडां खेलन्ति। बालिकाः वलय-कन्दुकेन क्रीडन्ति। केचिद्बालकाः बृहत्कन्दुकं जालस्य इत स्ततः कराभ्यां क्षिपन्तः खेलन्ति। केचित् तादृश मेव अन्यत् कन्दुकं भूमौ निक्षिप्य पादाभ्यां क्षिपन्तः उत्क्षिपन्त श्च खेलन्ति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

कबड्डी क्रीडा स्वदेशीया अपरिकरा च भवति। अस्यां क्रीडाया मपि द्वौ पक्षौ स्तः। कबड्डीखेलने बालकाः श्वासबन्धेन सह ध्वनिं कुर्वन्तः पश्चात् पक्षं प्रविश्य खेलन्ति। खेलनेन व्यायामो भवति। रक्तं शुद्धं भवति। मन श्च प्रसन्नं भवति। अतः बालानां क्रीडाङ्गणे खेलन मावश्यकम्।

प्रश्नाः – 1) कीदृशं [illegible] जनाः वदन्ति ?
2) क्रीडांगण मिति कस्य नाम ?
3) बालाः बालिका श्च क्रीडांगणे किं कुर्वन्ति ?
4) क्रीडाः कतिविधाः ?
5) कीदृश क्रीडासु व्ययोऽधिकः ?
6) सपरिकराः क्रीडाः काः ?
7) कबड्डी कीदृशी क्रीडा भवति ?
8) बालाः कन्दुकक्रीडाः कथं क्रीडन्ति ?
9) बालकाः कबड्डी कथं क्रीडन्ति ?
10) खेलनेन किं प्रयोजनम् ?

पूरयत – 1) स्वदेशीयासु ——————— ———न भवति।
2) —— क्रीडासु —— —— अधिकः।
3) केचित् जालं —— ———— खेलन्ति।
4) कबड्डी खेलने बालकाः——कुर्वन्तः,——प्रविश्य ——।
5) बालानां —— खेलने ——।

पदच्छेदः – बालिकाः + च, इति + अपि, क्रीडा + अगणं, विदेशीयाः च + इति, व्ययः + न, व्ययः + अधिकः, काः + चित् अपरिकराः + एव, इति + उच्यते। केचित् + बालकाः, इतः + ततः, मनः + च।

अमरकोशः – "जय्यस्तु जेतुं शक्यो जेता जिष्णु जैत्रजित्वरौ"

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(२४) चतुर्विंशः पाठः

राजा-ज्ञानी च

वंगदेशे गुणनिधि र्नाम कश्चित् पण्डितः महाज्ञानी प्रतिवसति स्म। सः प्रत्यहं प्रातः नदीं गत्वा स्नानादिकं विधाय गृह मागत्य शिष्येभ्यः पाठान् बोधयन्नास्त।

कस्मिश्चित् पर्वदिने बहवो जनाः नदीं गत्वा स्नात्वा आगच्छन्ति स्म। पण्डितोऽपि स्नानार्थं नदीं गतः। तदा तद्देशराजा तत्रागत्य स्नानादिकं विधाय

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ब्राह्मणेभ्यः दान-दक्षिणाः प्रयच्छन्नास्त। दान-दक्षिणाभिः सन्तुष्टाः ब्राह्मणाः गृहं प्रति गच्छन्ति स्म। गुणनिधिः नद्यां स्नानादिकं विधाय तीरमारुह्य सूर्याभिमुख स्सन् ध्याय न्नास्त। दान-दक्षिणां ग्रहीतुं अनागतं इमं पण्डितं दृष्ट्वा राजा स्वयं तत्समीपं गतः प्राह- "आर्य ! सर्वेऽपि ब्राह्मणाः स्वाभिमतानि दानानि गृहीत्वा गताः। भवान् किमपेक्षते ? गां, भुवं, स्वर्णं उत ग्रामं ? किमपेक्षितं ? ब्रूहि, दास्यामि" इति।

गुणनिधिः प्रत्याह – राजन् ! मदपेक्षितं त्वं दातुं न शक्नोषि। भगवतः सूर्यस्य उष्णकिरणैः मम शरीरे यः प्रभावः जायते स न त्वया कर्तुं शक्यः। प्रत्युत त्वं अन्तरागत्य सूर्यकिरणान् निवारयसि। कृपया अपसृत्य अनुग्रहः कर्तव्यः। तदेव मेऽपेक्षितम् इति। विनीतो राजा तस्य ज्ञानिनः निरपेक्षतां विज्ञाय दूर मपसृत्य मन्त्रिण माहूय तस्य पण्डितस्य कृते बहून् ग्रामान् दत्वा राजधानीं जगाम।

प्रश्नाः – 1) गुणनिधिः कः ?
2) सः कुत्र प्रतिवसति स्म ?
3) सः प्रत्यहं किं कुर्वन्नास्त ?
4) पर्वदिने राजा नदीतीरे किं कुर्वन्नास्त ?
5) गुणनिधिः तत्र किं कुर्वन्नास्त ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

6) राजा पण्डितं प्रति किमाह ?
7) गुणनिधिः राजानं किं प्रत्याह ?
8) अन्ते राजा किमकरोत् ?

पूरयत – 1) गुणनिधिः प्रत्यहं —— गत्वा —— विधाय-गृहं —— ——— पाठान् बोधयन् ——— ।
2) तद्देशराजा विधाय ब्राह्मणेभ्यः ———आस्त ।
3) गुणनिधिः नद्यां —— —— तीरं —— सूर्याभिमुखः ——— ध्यायन् ——— ।
4) भगवतः सूर्यस्य —— मम शरीरे —— —— जायते स ———कर्तुं—— ——— ।
5) —— राजा ज्ञानिनः निरपेक्षतां — दूरं —— मन्त्रिणं —— तस्य पण्डितस्य ——बहून्——राजधानीं——

पदच्छेदः – गुणनिधिः + नाम, बोधयन् + आस्त, कस्मिन् + चित् पण्डितः + अपि, प्रयच्छन् + आस्त, ध्यायन् + आस्त, सर्वे + अपि,

अमरकोशः – "धीरो मनीषी ज्ञः प्राज्ञः संख्यावान् पण्डितः कविः ।

••••••

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(२५) पञ्चविंशः पाठः

महाभारत कथा

पुरा हस्तिनापुर-राज्यं धृतराष्ट्रो नाम राजा शशास। स जनुषाऽन्धः। तथाऽपि तस्य अनुजः पाण्डुः प्रतिनिधि र्भूत्वा राज्य-कार्यं निर्वहन्नास्त। धृतराष्ट्रस्य गान्धार्यां दुर्योधन-दुश्शासनादयः शतं पुत्राः बभूवुः। पाण्डो स्तु कुन्ती, माद्री इति द्वे भार्ये आस्ताम्। तयोः तस्य धर्मपुत्रः, भीमसेनः अर्जुनः, नकुलः, सहदेव श्चेति पञ्च पुत्राः अजायन्त। प्रथमं त्रयः कुन्तीपुत्राः पश्चात् द्वौ माद्रीपुत्रौ। पुत्राणां बाल्यवयसि एव पाण्डु र्मृतः। अतः धृतराष्ट्र एव तेषां अपि रक्षकोऽभवत्।

बाल्यादारभ्य धार्तराष्ट्राणां पाण्डवानां च मध्ये विरोधो वर्धमान आसीत्। पाण्डवज्येष्ठः युधिष्ठिरः शान्तस्वभाव आसीत्। सर्वेषा मपि कुमाराणां द्रोणाचार्यस्य सकाशे विद्याभ्यासः अभवत्। अस्त्र-शस्त्र विद्यायां निपुणतया अर्जुनः आचार्यस्य प्रीतिपात्र मभवत्। दुर्योधनः भीमसेन श्च गदायुद्धे निपुणौ बभवताम्। अस्त्र विद्याप्रदर्शनोत्सवे कर्णः दुर्योधनस्य मित्र मभवत्। दुर्योधनस्य मातुलः शकुनि र्नाम दुष्टबुद्धि रासीत्। दुर्योधनदुश्शासनौ शकुनि कर्णौ च आहत्य दुष्ट - चतुष्टय

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मिति प्रथितम् । पञ्च पाण्डवाः द्वारकानाथं श्रीकृष्ण मेव शरणं गताः । अतः श्रीकृष्णः परमात्मा पाण्डव-पक्षपाती इति प्रथितः ।

धृतराष्ट्रः पाण्डवानां राज्यभाग मदात् । स्वराज्यं प्राप्ताः पाण्डवाः श्रीकृष्णानुग्रहेण पराक्रमेण च दिग्विजयं कृत्वा राजसूययागेन साम्राज्य-सुख मन्वभवन् । असूया ग्रस्तः दुर्योधनः मातुलसाहाय्येन मायाद्यूते पाण्डवान् विजित्य तदीयं राज्य मपाहरत् । द्युतसमयानुसारेण राज्यभ्रष्टाः पाण्डवाः द्वादश वत्सरान् वनवासं, एकं वर्षं अज्ञातवासं च कर्तुं प्रस्थिताः । वनवासेऽपि पाण्डवान् बाधितुं यतमानो दुर्योधनः विफलता मेव गतः । अज्ञात-वासे पाण्डवाः गुप्तरूपाः नामान्तरैः विराटनगरे राजाश्रये स्थिताः । गोग्रहणव्याजेन पाण्डवान् प्रकाशयितुं दुर्योधनः वृथा प्रायतत । अज्ञातवासकालं समाप्तं विचिन्त्य पाण्डवाः स्वराज्यं प्राप्तु मुद्युक्ताः । श्रीकृष्णः पाण्डव-पक्षे दूतकार्य मकरोत् । दुर्योधनः सूच्यग्रपरिमिताऽपि भूमि र्न दीयेत इत्यब्रवीत् । अतः शान्तिप्रयत्नः विफलोऽभवत्, युद्ध मेवाऽभवत् ।

अस्मिन् महाभरत - युद्धे श्रीकृष्णानुग्रहेण पाण्डवाः दुर्योधनादीन् अजयन् । "यतो धर्म स्ततो जयः" इति नीति स्सिद्धा ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

प्रश्नाः – 1) धृतराष्ट्रः कः कीदृशः ?
2) तस्य कति पुत्राः ?
3) पाण्डोः पुत्राः कति ?
4) कुमाराणां विद्याभ्यासः कुत्र आसीत् ?
5) कः आचार्यस्य प्रीतिपात्रं कथं च अभवत् ?
6) दुष्टचतुष्टयं किं ?
7) श्रीकृष्णः पाण्डवपक्षपाती कुतः अभवत् ?
8) कुतः पाण्डवाः वनवासं कर्तुं प्रस्थिताः ?
9) स्वराज्यं प्राप्ताः पाण्डवाः कथ मासन् ?
10) महाभारतयुद्धं कुतोऽभवत् ?
11) युद्धे के कान् अजयन् ?
12) अस्याः कथायाः नीतिः का ?

पूरयतः – 1) हस्तिनापुरराज्यं —— नाम राजा ——— ।
2) पाण्डुः——भूत्वा——निर्वहन्नास्त ।
3) पाण्डोस्तु—— ——इति द्वे भार्ये—— ।
4) बाल्यादारभ्य—— ——च मध्ये विरोधो—— ।
5) असूयाग्रस्तः ——— ——— मायाद्यूते ——— ——— तदीयं राज्यं——— ——— ।
6) अज्ञातवासकालं —— पाण्डवाः —— प्राप्तुं उद्युक्ताः ।

पदच्छेदः – धृतराष्ट्रः + नाम, जनुषा + अन्धः, तथा + अपि, प्रतिनिधि + भूत्वा, निर्वहन् + आस्त, पाण्डोः + तु, सहदेवः + च + इति, माण्डुः + मृतः, रक्षकः + अभवत्, बाल्यात् + आरभ्य, निपुणौ + अभवताम्, वनवासे + अपि, सूची + अग्र + परिमिता + अपि, भूमिः + न, इति + अब्रवीत्, विफलः + अभवत्, यतः + धर्मः + ततः + जयः, नीतिः + सिद्धा

अमरकोशः – "युद्ध मायोधनं जन्यं प्रधनं प्रविदारणम्"

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(२६) षड्विंशः पाठः

सुभाषितानि

१. प्रथमे नाऽर्जिता विद्या द्वितीये नाऽर्जितं धनम्
तृतीये नाऽर्जितं पुण्यं, चतुर्थे किं करिष्यति ?।

२. नरस्याभरणं रूपं रूपस्याभरणं गुणः ।
गुणस्याभरणं ज्ञानं, ज्ञानस्याभरणं क्षमा ।।

३. परोपकाराय फलन्ति वृक्षाः परोपकाराय वहन्ति नद्यः ।
परोपकाराय दुहन्ति गावः परोपकारार्थ मिदं शरीरम् ।।

४. कराग्रे वसते लक्ष्मीः, करमध्ये सरस्वती ।
करमूले तु गोविन्दः, प्रभाते करदर्शनम् ।।

५. वर मेको गुणी पुत्रो न च मूर्खशतान्यपि ।
एक श्चन्द्र स्तमो हन्ति न च तारासहस्रकम् ।।

६. हस्तस्य भूषणं दानं, सत्यं कण्ठस्य भूषणम् ।
श्रोत्रस्य भूषणं शास्त्रं, भूषणैः किं प्रयोजनम् ।।

७. प्रदोषे दीपक श्चन्द्रः, प्रभाते दीपको रविः ।
त्रैलोक्ये दीपको धर्मः, सुपुत्रः कुल-दीपकः ।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

८. सुखार्थी चेत् त्यजे द्विद्यां, विद्यार्थी चेत्त्यजे त्सुखम् ।
सुखार्थिनः कुतो विद्या ? कुतो विद्यार्थिनः सुखम् ।।

९. सत्यं ब्रूयात् प्रियं ब्रूयात न ब्रूयात् सत्य मप्रियम् ।
प्रियं च नाऽनृतं ब्रूयात्, एष धर्म स्सनातनः ।।

१०. सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु, मा कश्चिद्दुःखभाग्भवेत् ।।

प्रश्नाः – 1) प्रथमे वयसि किमार्जनीयम् ?

2) ज्ञानस्य आभरणं किम् ?

3) वृक्षाः किमर्थं फलन्ति ?

4) प्रभाते करदर्शन किमर्थम् ?

5) कीदृशः पुत्रः एको वरम् ?

6) हस्तस्य भूषणं किम् ?

7) कीदृशः सुपुत्रः ?

8) विद्यार्थी किं त्यजेत् ?

9) किं कथं ब्रूयात् ?

10) कः सनातनः धर्मः ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पूरयत – 1) सव —— सुखिनः, सर्वे सन्तु ———— ।

2) सर्वे —— पश्यन्तु, ———— दुःखभाग्भवेत्

3) एक श्चन्द्रो——हन्ति, न च —— ।

4) —— इद शरीरम् ।

5) श्रोत्रस्य भूषणं ——— ।

6) ———— आभरणं ज्ञानम् ।

7) करमध्ये —— —— ।

8) त्रैलोक्ये —— धर्मः ।

9) न ब्रूयात्—— ——— ।

10) —— वहन्ति नद्यः ।

पदच्छेदः – न + आर्जिता, नरस्य + आभरणं, एकः + गुणी, पुत्रः + न शतानि + आपि, एकः + चन्द्रः + तमः + हन्ति, दीपकः + रविः, त्यजेत् + विद्यां, चेत् + त्यजेत्, कुतः + विद्या न + अनृतं, धर्मः + सनातनः, कः + चित् + दुःखभाक् + भवेत्

अमरकोशः – "व्याहार उक्ति लंपितं भाषितं वचनं वचः"

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(२७) सप्तविंशः पाठः

(संख्यानम्) संख्यावाचकाः

गुरुः – रमेश ! त्वं संख्यानं कियत्पर्यन्तं जानासि ?

रमेशः – विंशतिपर्यन्तं जानामि भोः ।
ततः परं ज्ञातुमिच्छामि ।

गुरुः – साधु, श्रुणु तावत् । शत-पर्यन्तं संख्यानं ब्रवीमि ।

21. एकविंशतिः
22. द्वाविंशतिः
23. त्रयोविंशतिः
24. चतुर्विंशतिः
25. पञ्चविंशतिः
26. षड्विंशतिः
27. सप्तविंशतिः
28. अष्टाविंशतिः
29. एकोनत्रिंशत्
30. त्रिंशत्
31. एकत्रिंशत्
32. द्वात्रिंशत्
33. त्रयस्त्रिंशत्
34. चतुस्त्रिंशत्
35. पञ्चत्रिंशत्
36. षट्त्रिंशत्
37. सप्तत्रिंशत्
38. अष्टत्रिंशत्
39. एकोनचत्वारिंशत्
40. चत्वारिंशत्
41. एकचत्वारिंशत्
42. द्विचत्वारिंशत्
43. त्रिचत्वारिंशत्
44. चतुश्चत्वारिंशत्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

45. पञ्चचत्वारिंशत्
46. षट्चत्वारिंशत्
47. सप्तचत्वारिंशत्
48. अष्टचत्वारिंशत्
49. एकोनपंचाशत्
50. पंचाशत्
51. एकपंचाशत्
52. द्विपंचाशत्
53. त्रिपंचाशत्
64. चतुष्पंचाशत्
55. पञ्चपञ्चाशत्
56. षट् पञ्चाशत्
57. सप्त पञ्चाशत्
58. अष्ट पञ्चाशत्
59. एकोनषष्टिः
60. षष्टिः
61. एकषष्टिः
62. द्विषष्टिः
63. त्रिषष्टिः
64. चतुष्षष्टिः
65. पञ्चषष्टिः
66. षट्षष्टिः
67. सप्तषष्टिः
68. अष्टषष्टिः
69. एकोनसप्ततिः
70. सप्ततिः
71. एकसप्ततिः
72, द्विसप्ततिः
73. त्रिसप्ततिः
74. चतुस्सप्ततिः
75. पञ्चसप्ततिः
76. षट्सप्ततिः
77. सप्तसप्ततिः
78. अष्टसप्ततिः
79. एकोनाशीतिः
80. अशीतिः
81. एकाशीतिः
82. द्व्यशीतिः
83. त्र्यशीतिः
84. चतुरशीतिः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

85. पञ्चाशीतिः
86. षडशीतिः
87. सप्ताशीतिः
88 अष्टाशीतिः
89. नवाशीतिः
90. नवतिः
91. एकनवतिः
92. द्विनवतिः
93. त्रिणवतिः
94. चतुर्णवतिः
95. पञ्चनवतिः
96. षण्णवतिः
97. सप्तनवतिः
98. अष्टनवतिः
99. एकोनशतं
100. शतम्

रमेशः – किंभोः । सर्वं एतत् कंठस्थं करणीयं वा ?

गुरुः – अथ किम् । इदानीं संख्येयानि प्रसिद्धानि ब्रवीमि, श्रुणु ।

एकं – ब्रह्म; भगवान् सर्वेशरः एक एव खलु ।
द्वे – नेत्रे,
द्वौ – करौ, कर्णौ च
त्रयः – लोकाः तिस्रः त्रीणि - भुवनानि
मूर्तयः, ब्रह्मा-विष्णुः-शिवः
चत्वारः – वेदाः
पञ्च – भूतानि काव्यानि,
षट् – रसाः, शास्त्राणि, गुणाः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सप्त – मरुतः, पदार्थाः

अष्ट – दिशः, दिग्गजाः, वसवः

नव – निधयः ब्रह्माणः

दश –अवताराः

एकादश– रुद्राः

द्वादश – आदित्याः

चतुर्दश – भुवनानि (ऊर्ध्वाधोलोकाः)

पञ्चदश– तिथयः

षोडश –कलाः

अष्टादश– पुराणनि

विंशतिः – अंगुल्यः

एवं संख्ययानि भवन्ति ।

व्याकरण विशेषः

पूरणार्थे –

संख्या	संख्येयम्	संख्या	संख्येयम्
एकं	प्रथमः	षट्	षष्ठः
द्वे	द्वितीयः	सप्त	सप्तमः
त्रीणि	तृतीयः	अष्ट	अष्टमः
चत्वारि	चतुर्थः	नव	नवमः
पञ्च	पञ्चमः	दश	दशमः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एकादश	एकादश:	सप्तदश	सप्तदश:
द्वादश	द्वादश:	अष्टादश	अष्टादश:
त्रयोदश	त्रयोदश:	एकोनविंशति:	एकोनविंश:
चतुर्दश	चतुर्दश:	विंशति:	विंश:, विंशतितम:
पचदश	पञ्चदश:	एकविंशति:	एकविंशतितम:
षोडश	षोडश:		

सूचना – विंशते: परं "तम" प्रत्ययं संयोज्यापि संख्येय वाचकं निष्पादनीयम् ।

द्वयम् – द्वयी	सप्तकम्
त्रयम् – त्रयी	अष्टकम्
चतुष्टयम्	नवकम्
पञ्चकम्	दशकम्
षट्कम्	

सूचना – समूहार्थं एवं भवति ।

Kirtikant Sharma Collection, Najafgarh